# श्रीमहालक्ष्म्यष्टकम्

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ।। 1।।
नमस्ते गरुडारूढे कोलासुरभयङ्करी ।
सर्वपापहरे देवि महालक्ष्मि नमोऽतु ते ।।2।।
सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि।
सर्वदु:खहरे देवि महालक्ष्मि नमोऽस्तु ते ।।3।।
सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि ।
मन्त्रपूते सदा देवि महालक्ष्मि नमोऽस्तु ते ।।4।।
आद्यन्तरहिते देवि आद्यशक्तिमहेश्वरि ।
योगजे योगसम्भूते महालक्ष्मि नमोऽस्तु ते ।।5।
स्थूलसूक्ष्ममहारौद्रे महाशक्तिमहोदरे ।
महापापहरे देवि महालक्ष्मि नमोऽतु ते ।।6।।
पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ।
परमेशि जगन्मातर्महालक्ष्मि नमोऽतु ते ।।7।।
श्वेताम्बरधरे देवि नानालंकारभूषिते ।
जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते ।।8।।
महालक्ष्म्यष्टकं स्तोत्रं य: पठेद्भक्तिमान्नर: ।
सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ।।9।।
एककाले पठेन्नित्यं महापापविनाशनम् ।
द्विकालं य: पठेन्नित्यं धनधान्यसमन्वित: ।।10।।
त्रिकालं य: पठेन्नित्यं महाशत्रुविनाशनम् ।
महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ।।11।।

***इतीन्द्रकृतं महालक्ष्म्यष्टकं सम्पूर्णम् ।***

## श्रीमहालक्ष्म्यष्टकम् पाठ करने से लाभ

**नोट:** जो भक्त प्रतिदिन तीन काल इस महालक्ष्म्यष्टक का पाठ करता है उसकी महान शत्रुओं का नाश हो जाता है और उसके ऊपर कल्याणकारिणी वर्दायिनी महालक्ष्मी जी सदा ही प्रसन्न रहती हैं।